## श्रीमानतुङ्गाचार्य रचित श्रीभक्तामरस्तोत्रनी

# अज्ञातकर्तृक अवचूरि

**पंन्यास श्रीचन्द्रविजय**

आ. श्री विजयशीलचन्द्रसूरिजी म. द्वारा प्राप्त भक्तामर स्तोत्रनी अप्रगट–हस्तलिखित अवचूरिनी प्रति, १० पत्रनी अने अन्तमांना उल्लेख प्रमाणे ३७६ श्लोक प्रमाणनी छे.

अवचूरि तेने कही शकाय के : (१) ग्रन्थनी वृत्तिना लांबा अर्थो, वधारे करेली छणावट, बीजा पर्यायो, अर्थान्तरो वगेरे छोडी दईने सारभूत एवा मूलभूत टीकाना ज टीकांशो (२) अथवा ग्रन्थने संक्षिप्तरूपमां के (३) पर्यायरूपमां ढाळीने समजाववुं ते.

भक्तामर स्तोत्रनी आ अवचूरि माटे कंईक जाणीए. अवचूरिकार प्रारम्भमां नमस्कारात्मक श्लोकमां देलुल्लुपुरनायक श्री युगादीश–आदीश्वर भगवानने नमस्कार करी भक्तामरमहास्तोत्रनो कंईक अर्थ जणावे छे.

श्लोक वांचता पहेला तो एवो ज ख्याल आवी जाय के : पोते ज स्तोत्र सम्बन्धी अर्थ जणावी रह्या छे– लखी रह्या छे. परन्तु अन्तमां लखेल– ''इति श्री भक्तामरस्तोत्रस्याऽवचूरिर्लिखिता वृत्तेरुपरि'' एनाथी ख्याल आवे छे के वृत्ति उपरनी ज आ अवचूरि छे. अने ए वृत्ति सं. १४२६ ना वर्षे रुद्रपल्लीयगच्छीय पूज्य गुणाकरसूरि म. रचित १५७२ श्लोक प्रमाण विवृत्ति टीका.

विवृत्तिटीकानी साथे सरखावता–मेळवता अवचूरि माटे करेल उपरोक्त अर्थघटन–विधान सार्थक जणाय छे.

जैन साहित्य–जगतमां अवचूरि सम्बन्धी विपुल साहित्य प्रगट–अप्रगट स्वरूपे विद्यमान छे.

प्रस्तुत अवचूरिना कर्ता कोण ? ते कई सालमां रचना वगेरे आदि–अंतमां लखेल न होवाना कारणे जाणी शकातुं नथी.

अवचूरिकारश्रीए प्रारम्भ श्लोकमां जणावेल 'देलुल्लापुर' नाम विशे,

आ प्रतिनुं लिप्यन्तर-संशोधन पूर्ण कर्या पछी ज्यारे मारा पू. गुरु म. (आ. श्री वि.सोमचंद्रसूरिजी म.)ने दृष्टिपात करवा माटे आपी त्यारे पूज्यश्रीए जणाव्युं के जेम इलादुर्ग-इडर, वटपद्र-वडोदरा, दर्भावती-डभोई, मुम्बादेवी-मुम्बई, भृगुकच्छ-भरुच, सूर्यपुर-सुरत, पत्तन-पाटण तेम देलुल्लापुर-देलवाडा होई शके! आभार सह पूज्यश्रीनी आ वात मनमां ठसी जाय तेम छे.

पद्य १०ना प्रथम चरणमां जे 'भुवनभूषणभूत !' पाठ छे, तेमां भूतशब्द उपमावाची छे, तेवी स्पष्टता ध्यान देवा योग्य छे.

पद्य ११नुं चोथुं चरण '०जलनिधे रसितुं क इच्छेत् ?' ए प्रमाणे प्रसिद्ध छे. परन्तु अवचूरिमां स्पष्टतया 'जलमऽशितुं स्वादितुं' ए प्रमाणेनो पाठ छे. मुद्रित विवृत्तिटीका 'जलं रसितुं-स्वादितुं पातुमिच्छेत्' ए प्रमाणे छे.

पद्य २०नी अवचूरिमां अने टीकामां (टीकामां सामान्य शाब्दिक फेरफार छे) 'अस्मिन् वृत्ते सूरिमन्त्रः, वक्ष्यमाणवृत्तषट्केषु सूरिमन्त्रो ज्ञेयः' आ प्रमाणे उल्लेख होवाथी २० थी २६ सुधीना पद्योमां सूरिमंत्र निहित छे, तेवुं समजवुं पडे.

पद्य २५ना प्रथम चरण 'विबुधार्चितबुद्धिबोधात्'मां टीकाकार 'विबुधा-विशिष्टपण्डिता-गणधरास्तैरर्चितस्तीर्थकरस्तस्य बुद्धिः-केवलज्ञानं तया बोधो-वस्तुस्तोमस्य परिच्छेदस्तस्माद् विबुधार्चितबुद्धिबोधात्' आ प्रमाणे टीका करे छे. परन्तु अवचूरिकार '०बोधो यस्य, तस्मात्' आम बहुव्रीहिसमास करी पञ्चम्यन्त करेल छे.

पद्य ३३ना बीजा चरणमां अवचूरिकारने 'तथा परस्य' पाठना बदले 'तयाऽपरस्य' पाठसंमत छे केमके 'तथा तद्वदपरस्य' ए प्रमाणे अवचूरि मळे छे.

स्तोत्रनुं ४४मुं पद्य पूर्ण थया बाद- ''इति भक्तामरस्तवसंपूर्णो लिखितः। युगप्रधानभट्टारक श्रीजिनचन्द्रसूरिशिष्य पण्डित हेममन्दिरगणीनां शिष्य पं. आणन्दकीर्तिगणीनां शिष्य पं. मेरुधीरमुनीनां शिष्य पं. डुंगरजी लिवी कृतम्॥'' आ प्रमाणेनो पाठ छे.

आ. श्री वि. शीलचन्द्रसूरिजी म.नो आभार मानुं छुं के जेओश्रीए निजी संग्रहमांथी आ प्रति आपी-श्रुतज्ञानना सेवानो लाभ आप्यो.

# ॥ भक्तामरस्तोत्रावचूरिः ॥

प्रणम्य श्रीयुगादीशं, देलुल्लापुरनायकम् ।
भक्तामरमहास्तोत्रस्यार्थः कश्चन लिख्यते ॥१॥

उज्जयिन्यां नगर्यां वृद्धभोजराज्यपूज्योऽधीतशास्त्रपूरो मयूरो नाम पण्डितः प्रतिव[स]ति स्म । जामाता बाणः, सोऽपि विचक्षणः, द्वयोरन्योऽन्यं मत्सरः, तौ द्वावपि राजानमसेविषाताम् ।

एकदा बाणस्य स्वस्त्रिया सह प्रणयकलहः संजज्ञे । सा कामिनी मानिनी मानं नाऽमुञ्चत् । रजनी बहुरगच्छत् । मयूरः शरीरचिन्तार्थं व्रजन् तं भूभागमागमत् । वातायने दम्पत्योर्ध्वनं (ध्वनिं) श्रुत्वा तस्थौ । 'पतिव्रते ! क्षमस्वाऽपराधमेकम्, न पुनः कोपयिष्ये त्वाम्' इत्युक्त्वा बाणः पत्नीपदयोरपतत् । सा सनूपरा(पुरा)भ्यां पद्भ्यां तं जघान । गृहगवाक्षाधोभागस्थितेन मयूरेण बाणोक्तं 'सुभ्रु' इति पदं श्रुतम् । श्रुत्वा मयूरो बाणमभाणीत्- 'सुभ्रुपदं मा वादीः, सकोपनत्वात्, 'चण्डि' इत्थं पठ' इत्याकर्ण्य सा सती मुखस्थताम्बूलरसक्षेपात् 'कुष्ठी भव' इति पुत्रीचरित्रप्रकाशकं जनकं शशाप । तत्क्षणं कुष्ठमण्डलान्य-भवंस्तत्तनौ ।

बाणः प्रातः पूर्वमेव नृपपर्षदं यातो वरकवस्त्रं परिधाय समेतं मयूरं प्रति 'आविउ चिरकोढी' इति श्लिष्टं वच उवाच । राज्ञा तद् ज्ञात्वा दृष्ट्वा च 'कुष्ठं निर्गमय्याऽऽगन्तव्यम्' इत्यवादि मयूरः । तदनन्तरं सूर्यप्रासादे गत्वा सूर्यं संस्तूय निजकुष्ठं निर्गमितं मयूरेण । मयूरमहिममत्सरी बाणः पाणिचरणौ वर्धयित्वा कृतप्रतिज्ञः चण्डिकां संस्तुत्य चतुरङ्गानि पुनर्नवीचकार । तस्याऽपि महती पूजा राज्ञा चक्रे । तयोर्महिमानमालोक्य- 'किं शिवदर्शनं विनाऽन्यत्राऽ-प्येतादृक्षप्रभावकवित्वशक्तिकलितः कोऽप्यस्ति ?' इति पार्षद्यानपृच्छत् श्रीभोजः । राजमन्त्री श्रावकोऽवक्- 'देव ! शान्तिस्तवविधातृ-श्रीमानदेवाचार्यपट्टमुकुटा भयहरभत्तिहर(भर)स्तवादिप्रकटाः श्रीमानतुङ्गसूरयः श्वेताम्बराः सन्ति । आकार्य पृष्टाः-'काञ्चन कवित्वकलां दर्शयध्वम्' इति । ते ऊचुः-'महाराज ! यदि निगड-नियन्त्रितात्मानं मोचयित्वा निस्सरामि, तदा कोऽप्यादिदेवप्रभावो ज्ञेयः । ततो राज्ञा लोहभारशृङ्खलबद्धसर्वाङ्गाः सतालकद्विचत्वारिंशन्निगडनियन्त्रिता उत्पाट्य

गृहान्तः क्षिप्ताः । तत्र स्तोत्रस्यैकेन वृत्तेनैककं बन्धनं त्रुटितं क्रमेण । एके वदन्ति– द्विचत्वारिंशता वृत्तेनैकेन पेतुः । तालकभङ्गोऽपि [अ]जनिष्ट । बहिरागताः सूरयः । नमस्कृताः श्रीभोजेन । 'जिन(जैन)–दर्शनं सकलम्' इति मेने । इति स्तवमूलप्रबन्धः ॥

अथाऽर्थो लिख्यते, यथा–

**भक्तामरप्रणतमौलिमणिप्रभाणा–मुद्योतकं दलितपापतमोवितानम् ।**
**सम्यक् प्रणम्य जिनपादयुगं युगादा–वालम्बनं भवजले पततां जनानाम् ॥१॥**

**यः संस्तुतः सकलवाङ्मयतत्त्वबोधा–दुद्भूतबुद्धिपटुभिः सुरलोकनाथैः ।**
**स्तोत्रैर्जगत्त्रितयचित्रहरैरुदारैः स्तोष्ये किलाऽहमपि तं प्रथमं जिनेन्द्रम् ॥२॥**

सम्यग् जिनपादयुगं प्रणम्य, 'किल' इति सम्भावनायाम्, 'अहं तं प्रथमं जिनेन्द्रं स्तोष्ये' इति सम्बन्धः । जिनस्य प्रथमतीर्थकृतः, पादौ चरणौ, तयोर्युगं युग्मं जिनपादयुगम्, सम्यक् त्रिकरणशुद्ध्या नत्वा । किंभूतम् ? उद्योतयतीति उद्योतकं प्रकाशकम् । भक्ताः परिचर्यायुक्ता येऽमरा देवास्तेषां नमस्कारवशात् प्रणता नम्रा ये मौलयो मुकुटानि शिरांसि वा, तेषां मणयश्चन्द्र–कान्तादयस्तासां (तेषां) प्रभा रुचिस्तासाम् । पुनः किंलक्षणम् ? दलितं क्षिप्तं पापमेव तमोवितानं ध्वान्तजाल(लं) येन तत् । ऋजुजडनराणां शिल्पि (शिल्प)–नीति–लिपिकलादर्शनात् चतुःपुरुषार्थप्रकटनाद् द्विविधधर्मप्रकाशनाद् वा भगवता सुषमदुःषमाप्रान्तेऽपि युगादिकालः कृतः, अतो युगादौ । भवो जन्म–जरा–मरणरूपः संसार एव जलम्, तत्र भवजले पततां मज्जतां भव्यसत्त्वानाम्, आलम्बनमाधारः सदुपदेशात् । यया जले पततां द्वीपं यानपात्रं [वा] आलम्बनम्, तथा भवे निमज्जतां जिनपादार[विन्द]मेवाऽऽधारः । अहमपि मानतुङ्गाचार्योऽज्ञोऽपि सुरेन्द्राद्यपेक्षया जडधीः, नाऽन्येषामपेक्षयेति हृदयम् । स्तोष्ये गुणोद्भावनेन कीर्तयिष्यामि । तं प्रथमं श्रीनाभेयं जिनम् । यत्तदोर्नित्याभिसम्बन्धाद् यो भगवान् स्तोत्रैः शक्रस्तवाद्यैः, सुष्ठु राजन्ते सुराः, तेषां लोकः स्वर्गस्तस्य नाथैः प्रभुभिः सुरलोकनाथैः, संस्तुतः सम्यग् नुतः । [अथवा] सुरश्चाऽसौ लोकश्च सुरलोको देवसमूहस्तस्य नाथैरिन्द्रैः । किंभूतैस्तैः ? सकलं सम्पूर्णं यद् वाङ्मयं शास्त्रजातं तस्य तत्त्वं रहस्यम्, तस्य बोधाद् ज्ञानात् परिच्छेदाद्, उद्भूता उत्पन्ना या बुद्धिः प्रज्ञा, तया पटुभिः कुशलैः । स्तोत्रैः किंभूतैः ? जगतां भूर्भुवः[स्वः]स्वरूपाणां

त्रितयस्य चित्तं हरन्तीति तथा, तैः । उदारैर्महार्थैः ॥

अत्राऽऽद्यवृत्तेऽतिशयाः, यथा–उद्योतकमिति पूजातिशयः । दलितपाप–तमोवितानमिति अपयापगमातिशयः, आलम्बनमिति ज्ञान–वचनातिशयौ, यतो ज्ञानी सद्वाक्यश्च जनाधारो भवति ॥ काव्यद्वयस्मरणाद् विपत्प्रलयो भवति, हेमश्रावकवत् ॥१–२॥

इति (अथ) कविरात्मौद्धत्यं परिजिहीर्षुराह–

**बुद्ध्या विनाऽपि विबुधार्चितपादपीठ**
**स्तोतुं समुद्यतमतिर्विगतत्रपोऽहम् ।**
**बालं विहाय जलसंस्थितमिन्दुबिम्ब–**
**मन्यः क इच्छति जनः सहसा ग्रहीतुम् ? ॥३॥**

बुद्ध्या० । हे विबुधार्चितपादपीठ ! हे दैवतव्रातपूजितपदासन ! बुद्ध्या विनाऽप्यहं मानतुङ्गाचार्यः स्तोत्रं(स्तोतुं) समुद्यतमतिः स्तवाय कृतमतिव्यापारो वर्ते । अत एव विगतत्रपोऽशक्यवस्तुनि प्रवर्तनान्निर्लज्जः । दृष्टान्तमाह– बालं शिशुं विहाय मुक्त्वा कोऽन्योऽपरो जनः सचेतनो जलसंस्थितं नीरकुण्डमध्यप्रतिबिम्बितम् इन्दुबिम्बं चन्द्रमण्डलं ग्रहीतुं सहसा तत्कालमिच्छत्यभि–लषति ?। बालस्तद्ग्रहणाग्रह[ग्रहि]लो भवति, नाऽपरः, अहमपि बालरूपो ज्ञेयः ॥३॥ अथ जिनेन्द्रस्तुतावन्येषां दुःकरतां दर्शयन्नाह–

**वक्तुं गुणान् गुणसमुद्र ! शशाङ्ककान्तान्,**
**कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या ?।**
**कल्पान्तकालपवनोद्धतनक्रचक्रं,**
**को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ॥४॥**

वक्तु० । हे गुणसमुद्र ! स्थैर्यादिगुणरत्नरत्नाकर ! को बुधस्ते तव शशाङ्ककान्तान् निर्मला (निर्मलकलाभृत्) कमनीयान् शान्ततादीन् गुणान् वक्तुं जल्पितुं क्षमः समर्थः । किंभूतोऽपि ? प्रतिभया सुरगुरुप्रतिमोऽपि वाचस्पति–समोऽपि । अत्र दृष्टान्तः–वाऽथवा अम्बुनिधिं कस्तरणकलाकुशलो नरो भुजाभ्यां तरीतुं प्राप्तुमलंमशक्तः (प्राप्तुमलं शक्तः) ? अपि तु न कश्चिदित्यर्थः । किंभूतमम्बुनिधिम् ? कल्पान्तकालस्य पवनेनोद्धतानि ऊर्ध्वं चलितानि नक्रचक्राणि

यादो[वृ]न्दानि यत्रेति समासः । यथा युगान्तक्षुब्धाब्धितरणं दुःशकं तयाऽर्हत्कीर्तनं ग(गी)र्पतेरपि दुर्घटम्, तत्राऽहं प्रवृत्तः...... मन्त्रः । सुमतिश्राद्धकथा ज्ञेया ॥४॥ स्तवकरणप्रवृत्तौ क(का)रणमाह–

**सोऽहं तथाऽपि तव भक्तिवशान्मुनीश !,**
**कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः ।**
**प्रीत्याऽऽत्मवीर्यमविचार्य मृगो मृगेन्द्रं,**
**नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥५॥**

सोहं० । हे मुनीश ! सकलयोगीश ! तथाऽपि तव स्तोत्रकरणासामर्थ्ये सत्यपि सोऽहं क्षीरकण्ठप्रज्ञोऽपि स्तवारम्भे विगतशक्तिरपि क्षीणबलोऽपि । डमरुकमणिन्यायेनोभयत्राऽपि तवप्रयोगः । तव भगवतो (भवतो) भक्तिवशात् सेवाग्रहात् तव स्तवं स्तुतिं कर्तुं विधातुं प्रवृत्तः कृतोद्यमो जातः । अत्रोपमानम्– मृगो हिरणः (हरिणः) आत्मवीर्यं निजबलमविचार्यमविचिन्त्य निजशिशोः स्वीयबालस्य प्रीत्या प्रेम्णा परिपालनार्थं परिरक्षणाय मृगेन्द्रं सिंहं किं नाऽभ्येति किं न युद्धायाऽभिमुखो व्रजति ? अपि तु व्रजत्येव ॥५॥

अथ कविरसामर्थ्येऽपि वाचाटताहेतुमाह–

**अल्पश्रुतं श्रुतवतां परिहासधाम,**
**त्वद्भक्तिरेव मुखरीकुरुते बलान्माम् ।**
**यत् कोकिलः किल मधौ मधुरं विरौति,**
**तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥**

अल्पश्रुतं० । हे विश्वविश्रुत ! त्वद्भक्तिरेव त्वच्छुश्रूषैव बलाद् हठाद् मां मानतुङ्गाचार्यं मुखरीकुरुते अबद्धमुखीकरोति, वाचालं विधत्ते इत्यर्थः । मां किंभूतम् ? अल्पानि स्तोकानि शास्त्राणि यस्येति विग्रहः । अत एव तं श्रुतवतां दृष्टशास्त्राणां विदुषां परिहार(परिहास)धाम हास्यास्पदम् । अत्र दृष्टान्तदृढता– 'किल' इति सत्ये, यत् कोकिलः कलकलौ(–कण्ठो) मधौ वसन्ते मधुरौ(मधुरं) मृदुकण्ठं विरोति (विरौति) कूजति, तदहं मन्ये चारुचूतकलिकानां निकरः, स चासावेकहेतुश्चेति कर्मधारयः । यथाऽम्रमञ्जरीकृत–भोजनः पुंस्कोकिलो मधुरस्वरो भुवि मनोहरः स्यात्, तथाऽहं स्तोकग्रन्थोऽपि त्वद्भक्त्या स्तवं कुर्वाणः प्रवीणश्रेणौ

लब्धवर्णो भावीति वृत्तभावार्थः ॥६॥

हेतुमुक्त्वा स्तवकरणे यो गुणस्तमाह–

**त्वत्संस्तवेन भवसन्ततिसन्निबद्धं**
**पापं क्षणात् क्षयमुपैति शरीरभाजाम् ।**
**आक्रान्तलोकमलिनीलमशेषमाशु**
**सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥७॥**

त्वत्सं० । हे सकलपातकनाशन ! जिन ! त्वत्संस्तवेन भवद्गुणोत्कीर्तनेन शरीरभाजां प्राणिनां भवसन्ततिसन्निबद्धं जन्मकोटिसमर्जितं पापमष्टविधं कर्म क्षणाद् घटिकाषष्ठांशेन स्तोककालाद् वा क्षयमुपैति निर्नाशमुपयाति, शरीरभाजां जीवानाम् । अमुमेवार्थमुपमिमीते– पापे (पापं) किमिव ? अन्धकारमिव । यथा शार्वरं कृष्णपक्षि(–पक्ष–)रात्रिजं तिमिरं सूर्यांशुभिन्नं सहस्रकिर(–कर–) रोचिर्विदारितमाशु शीघ्रं क्षयं गच्छति यतः । किंभूतमन्धकारम् ? आक्रान्तलोकं व्याप्तविश्वम्, अलिनीलं मधुकरकुलकृष्णम्, अशेषं सकलम्, न तु स्तोकम् । पापविशेषणान्यप्यौचित्येन कार्याणि । राजकुले विवादादिषु स्मर्यते । [सु] धनस्येव जयो भवति ॥७॥

स्तवारम्भसामर्थ्यं द्रढयन्नाह–

**मत्वेति नाथ ! तव संस्तवनं मयेद–**
**मारभ्यते तनुधियाऽपि तव प्रभावात् ।**
**चेतो हरिष्यति सतां नलिनीदलेषु**
**मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥८॥**

[मत्वे०] । हे नाथ ! पूर्वोक्तयुक्त्या स्तवनकरणं दुःकरं सर्वपापहरं चेति मत्वाऽवबुध्य मया भक्तिवशेन तनुधियाऽपि स्वल्पमतिनाऽपि इदं प्रत्यक्षं भण्यमानं संस्तवनं स्तोत्रम्, कर्तुमिति शेषः, आरभ्यते करणायोद्यम्यते । इदं स्तवनं मत्कृतमपि तव प्रभावात् भवतोऽनुभावात् सतां सज्जनानां चेतो हरिष्यति मनो हरिष्यति, न तु दुर्जनानाम् । ननु [इति] निश्चये, उदबिन्दुर्वारिच्छटा नलिनीदलेषु कमलिनीपत्रेषु मुक्ताफलद्युतिं मौक्तिकच्छायामुपैति उपागच्छति । अत्र 'उदस्योदः' (पाणि० ६।३।५७) इति निपातः ॥८॥

अथ सर्वज्ञनामग्रहणमेव विघ्नहरमाह–

**आस्तां तव स्तवनमस्तसमस्तदोषं**
**त्वत्संकथाऽपि जगतां दुरितानि हन्ति ।**
**दूरे सहस्रकिरणः कुरुते प्रभैव**
**पद्माकरेषु जलजानि विकासभाञ्जि ॥९॥**

आस्तां० । अष्टादशदोषनिर्नाशन ! अस्तसमस्तदोषं निर्मूलितनिखिलदूषणं तव स्तवनं गुणोत्कीर्तनमास्तां तिष्ठतु दूरे । स्तवमहिमा महीयान् वर्तते । त्वत्संकथा त्वत्सम्बन्धिनी त्वद्विषयिणी पूर्वभवसम्बद्धनामवार्ताऽपि जगतां लोकानां दुरितानि पापानि विघ्नानि वा हन्ति । औपम्यं यथा–सहस्रकिरणः सूर्यो दूरे तिष्ठतु, प्रभैव अरुणच्छायैव पद्माकरेषु सरस्सु जलजानि मुकुलरूपकमलानि विकाशभाञ्जि स्मेराणि कुरुते । यदा सूर्योदयात् पूर्वप्रवर्तनी(–वर्तिनी) प्रभातप्रभा पद्मविकाश(शि)नी स्यात्, तदा सूर्यस्य किमुच्यते ?। तथा भगवद्गुणोत्कीर्तनस्तव–माहात्म्यं न कश्चिद् वक्तुमलम् । जिन(नाथ?) नामग्रहणसंकथैव सर्वदुरिति(त)नाश–(शि)नीति । सर्वरक्षाकारी मन्त्रो ज्ञेयः, केशवश्रेष्ठिवत् ॥९॥

अथ जिनस्तुति[सेवा]फलमाह–

**नाऽत्यद्भुतं भुवनभूषणभूत ! नाथ !**
**भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः ।**
**तुल्या भवन्ति भवतो ननु तेन किं वा**
**भूत्याऽऽश्रितं य इह नाऽऽत्मसमं करोति ॥१०॥**

नात्य० । हे भुवनभूषणभूत !, भूतशब्दोऽत्रोपमावाची, हे विश्वमण्डनसमान ! हे नाथ ! हे प्रभो ! भूतैर्विद्यमानैर्भुवि पृथिव्यां भवन्तं त्वामभिष्टुवन्तः स्तुवन्तो जना भवतस्तुल्या समा भवन्ति, एतन्नाऽत्यद्भुतं नाऽतिचित्रम् । अत्र व्यतिरेक–माह–ननु निश्चितम्, वाऽथवा, तेन स्वामिना किं कार्यं किं प्रयोजनम् ?, इह भवे जनमध्ये वा यः स्वामी आश्रितं सेवकं भूत्या ऋद्ध्या आत्मसमं निजतुल्यं न करोति न विधत्ते । अहमपि तीर्थङ्करं स्तुवन् तीर्थकृद्गोत्रार्जको भवितेति कवेराशयः ॥१०॥

अथ जिनदर्शनफलमाह–

**दृष्ट्वा भवन्तमनिमेषविलोकनीयं**
**नाऽन्यत्र तोषमुपयाति जनस्य चक्षुः ।**
**पीत्वा पयः शशिकरद्युति दुग्धसिन्धोः**
**क्षारं जलं जलनिधेरशितुं क इच्छेत् ? ॥११॥**

दृष्ट्वा० । हे प्रसन्नरूपस्वरूप ! अनिमे[षे]ण निर्निमेषेण विलोक्यते दृश्यत इत्यनिमेषविलोकनीयस्तम्, भवन्तं दृष्ट्वा वीक्ष्य जनस्य द्रष्टुर्भव्यस्य चक्षुर्नेत्रमन्यत्र देवान्तरे तोषं चित्तानन्दं नोपयाति उपैति । चक्षुरिति जातावेकवचनम् । अत्रोपमानम्– कः पुरुषो दुग्धसिन्धोः क्षीरसमुद्रस्य पयो दुग्धं जलं पीत्वा जलनिधेर्लवणाम्भोधेः क्षारं जलं कटुकं जलमशितुं स्वादितुं पातुमिच्छेत् ?, अपि तु न कश्चित् । दुग्धसिन्धोः पयः किंभूतम् ? शशिनः करास्तद्वद् द्युतिर्यस्येति तत् शशिकरद्युति चन्द्रकरद्युति चन्द्रकरनिर्मलम् । सर्वकर्मकरो मन्त्रः कपर्दिश्राद्धवत् कामधेनुसमागमात् ॥११॥

अय भ[ग]वद्रूपवर्णनमाह–

**यैः शान्तरागरुचिभिः परमाणुभिस्त्वं**
**निर्मापितस्त्रिभुवनैकललामभूत ! ।**
**तावन्त एव खलु तेऽप्यणवः पृथिव्यां**
**यत् ते समानमपरं नहि रूपमस्ति ॥१२॥**

यैः शान्त० । त्रिभुवनैकलकामभूतः(भूत)! यैः परमाणुभिर्दलिकै– र्निर्माणकर्मणा त्वं निर्मापितः कृतः । किंभूतैः ? शान्ता रागस्य रुचिः कान्तिर्येभ्यस्ते तथा, तैः । राग[स]हचरितश्च द्वेषपरिग्रहः । अथवा शान्तनामा नवमो रसस्तस्य रुचिः छाया येषु, तैः । खलु निश्चितम्, तेऽप्यणवस्तावन्त एव भगवद्रूपनिर्माणप्रमाणा एव प्रवर्तन्ते । यद् यस्मात् कारणात् पृथिव्यां भूपीठे ते तव समानं तुल्यमपरमन्यद् रूपं नाऽस्ति विद्यते । 'यैः परमाणुभिस्तेऽणवः' इति पौनरुक्त्यम् । तत्रेयं व्याख्या– औदारिकवर्गणायामभव्येभ्योऽनन्तगुणाणु–निष्पन्नाः स्कन्धा अनन्ताः सन्ति, तेषु स्कन्धेष्वणवः स्तोका एव जिनरूपपरमाणवः । अणुशब्दः स्तोकवाची, अथवा महाकविप्रयुक्तत्वाद् वा न पौनरुक्त्यम् । सारस्वतीविद्याऽस्त्यस्मिन्

वृत्ते। सुबुद्धिमन्त्रीशस्य कथा ज्ञेया ॥१२॥

अथ मुखवर्णनमाह–

**वक्त्रं क्व ते सुरनरोरगनेत्रहारि**
**निःशेषनिर्जितजगत्त्रितयोपमानम् ।**
**बिम्बं कलङ्कमलिनं क्व निशाकरस्य**
**यद् वासरे भवति पाण्डुपलाशकल्पम् ॥१३॥**

वक्त्रं० । अत्र क्वशब्दौ महदन्तरं सूचयतः । हे सौम्यवदन ! क्व ते तव वक्त्रं वर्तते ? क्व निशाकरस्य चन्द्रस्य बिम्बं मण्डलं विद्यते । किंभूतं वक्त्रम् ? सुरनरोरु(र)गाणां नेत्राणि हर्तुं शीलमस्येति विग्रहः । उरगा भवनवासिनः । पुनः किंभूतम् ? निःशेषाणि कमलदर्पणचन्द्रादीनि सर्वाणि ज(नि)र्जितानि जगत्त्रयस्योपमानानि येन तत् । चन्द्रबिम्बं[किं]भूतम् ? कलङ्कमलिनम् । यच्च चन्द्रबिम्बं वासरे दिने पाण्डुपलाशकल्पं जीर्णपक्वपाण्डुरपर्णसवर्णं भवति । मुखस्य तेनोपमा कथं घटत इति वृत्तार्थः । विद्या रोगापहारिणी समस्तवृत्तेऽस्मिन् ॥१३॥

अथ गुणव्याप्तिमाह–

**सम्पूर्णमण्डलशशाङ्ककलाकलाप–**
**शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति ।**
**ये संश्रितास्त्रिजगदीश्वर ! नाथमेकं**
**कस्तान् निवारयति सञ्चरतो यथेष्टम् ? ॥१४॥**

सम्पू० । हे त्रिजगदीश्वर ! त्रिजगन्नाथ ! तव गुणास्त्रिभुवनं लङ्घयन्ति अतिक्रामन्ति । किंभूताः ? सम्पूर्णमण्डल[ः]शशाङ्कः चन्द्र[स्त]स्य कलाकलापः करनिकरस्तद्वत् शुभ्रा धवलाः । ये गुणा एकमद्वितीयं नाथं संश्रिताः । कः पुरुषो यथेष्टं स्वेच्छया सञ्चरन्तः परिभ्रमन्तः (सञ्चरतः परिभ्रमतः) तान् गुणान् निवारयति निषेधयति ? अपि तु न कश्चित् । अस्मिन् वृत्ते द्वे विद्ये विषापहारिणी विद्या सर्वसमा(मी)हितदायिके वडासुश्रावककाकथास्ति सत्यकश्रेष्ठिनः कन्या डाहीकथा चाऽस्ति ॥१४॥

अथ भगवन्नीरागतामाह–

**चित्रं किमत्र यदि ते त्रिदशाङ्गनाभि–**
**नीतं मनागपि मनो न विकारमार्गम् ।**
**कल्पान्तकालमरुता चलिताचलेन**
**किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥१५॥**

चित्रं कि० । हे सकलविकारनिकार ! यदि त्रिदशाङ्गनाभिर्मोहनचेष्टाभिर्देवी–भिस्ते तव मनोऽन्तःकरणं मनागपि अल्पमात्रमपि विकारमार्गं न नीतं न प्रापितम्, अत्राऽस्मिन्नर्थे किं चित्रं किमाश्चर्यम् ?। अत्र दृष्टान्तमाह–कदाचित् कस्मिंश्चित् क्षणे चलिताचलेन कम्पितान्यपर्वतेन कल्पान्तकालमरुता प्रलयकाल–पवनेन मन्दराद्रिशिखरं मेरुशृङ्गं किं चलितं स्वस्थानात् किं धूतम् ? यतो युगान्तेऽपि सर्वपर्वतानां क्षोभो भवति, न सुमेरोः । तथा देवीभिरिन्द्र–गोपीन्द्र(गोपेन्द्र)–रुद्रादयः क्षोभिताः, न जिनेन्द्र इति । मन्त्रविद्ये, मन्त्रस्मरणाद् धनधान्यादि भवति । विद्यास्मरणाद् बन्धमोक्षो भवति । प्रभावे सज्जन–[गुणसेनसूरि]गुरुकथा ॥१५॥

अथ भगवतो दीपेनोपमानिरासमाह–

**निर्धूमवर्तिरपवर्जिततैलपूरः**
**कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि ।**
**गम्यो न जातु मरुतां चलिताचलानां**
**दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥१६॥**

निर्धूम० । हे त्रिभुवनभुवनैकदीप ! त्वमपरोऽपूर्वो दीपो वर्तसे । यतो दीपो धूमवान् सवर्तिस्तै[ले]नोद्योतको गृहमात्रप्रकाशो वातेन विध्याता चैकस्थानस्थः स्यात् । त्वमपूर्वदीपः किंभूतः ? नितरां गते निर्गते धूमवर्ती यस्मादसौ निर्धूमवर्तिः । धूमो द्वेषो वृत्तिः (वर्तिः) कामदशाश्चेति । अपवर्जितस्त्यक्तस्तैलपूरो येन स, तैलपूरः स्नेहप्रकारः । अन्यच्च त्वं कृत्स्नं सम्पूर्णं पञ्चास्तिकायात्मकं जगत्त्रयं विश्वत्रयमिदं [प्रत्यक्षगतं] प्रकटीकरोषि केवलोद्योतेन प्रकाशयसि । अन्यत् त्वं जातु कदाचित् चलिताचलानां धूतगिरीणां मरुतां वातानां न गम्यो न वशः । [अथवा परीषहोपसर्गेषु चलिताचलानां कम्पितपृथ्वीकानां मरुतां

देवानां न गम्यो नाऽऽकलनीयः] । जगत्प्रकाशो जगद्विश्रुतः । अथ[वा] जगत् चरिष्णु[ः] सर्वत्र प्रसारी [प्रकाशो ज्ञानालोको यस्य सः] । अत एवाऽपरोऽन्यो दीपस्त्वमिति । श्रीसम्पादिनी विद्याऽत्र वृत्ते ज्ञेया ॥१६॥

अथ सूर्येणो(णौ)पम्यनिरासमाह–

**नाऽस्तं कदाचिदुपयासि न राहुगम्यः**
**स्पष्टीकरोषि सहसा युगपज्जगन्ति ।**
**नाऽम्भोधरोदरनिरुद्धमहाप्रभावः**
**सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥१७॥**

नाऽस्तं कदा० । हे मुनीन्द्र ! मुमुक्षुप्रभो ! त्वं सूर्यातिशाय(यि) महिमाऽसि वर्तसे । सूर्यातिशायी (सूर्याद् अतिशायी) सविशेषो महिमा माहात्म्यं यस्य सः । यतो रविरस्तं प्रयाति, राहुणा परिभूयते, लक्षमात्रं विश्वं प्रकाशयति, मेघच्छन्नो निस्तेजाश्च स्यात् । त्वं त्वपूर्वं(र्वः) पूषा कदाचिद् रजन्यादौ नाऽस्तमुपयाति(सि) क्षयं न गच्छसि, केवली नक्तंदिवं सदाऽऽलोकः, न राहुगम्यः । राहुशब्देन कृष्णवर्णत्वाद् दुष्कृतं न तद्व्याप्तः । सहसा झटिति शीघ्रं युगपत् समकालं जगन्ति भुवनानि प्रकटीकरोषि स्पष्टयसि । न अम्भोधरोदरेण घनगर्भेण निरुद्धः छन्नो महाप्रभावो गुरुप्रतापो यस्य सः । अत्राऽम्भोधरशब्देन मति–श्रुतावधि–मनःपर्यय–केवलानामावरणानि गृह्यन्ते, पञ्चभिरेतैराव[र]णैर्न तिरोहितो ज्ञानोद्योतः, अत एव सहस्रकिरणादधिकमाहात्म्योऽसि । अस्मिन् वृत्ते परविद्याविच्छेदिनी विद्याऽस्ति, सङ्कर(सङ्गर?)राज्ञः कथा चाऽस्ति ॥१७॥

अथो (अथ) विशेषादिन्दूपमां निरस्यन्नाह–

**नित्योदयं दलितमोहमहान्धकारं**
**गम्यं न राहुवदनस्य न वारिदानाम् ।**
**विभ्राजते तव मुखाब्जमनल्पकान्ति**
**विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥१८॥**

नित्यो० । हे देववृन्दविद्यो(–वन्द्य) ! ते तव मुखाब्जं वदनकमलमपूर्वं शशाङ्कबिम्बं नवेन्दुमण्डलं विभ्राजते भाति । किंभूतम् ? नित्योदयं शाश्वत–शोभोल्लासम् । चन्द्रबिम्बं तु प्रातरस्तमेव । दलितं ध्वस्तं मोह एव महान्धकारं

येन [तत्] । चन्द्रबिम्बत्वऽल्पमेव (-बिम्बं त्वल्पान्धतमसनिरासे) न क्षमम् । राहुवदनस्य न गम्यम्, राहुसमदुर्वादिवादस्याऽगोचरम्(-रः) । वारिदानां न गम्यम्, मेघसमदुष्टाष्टकर्मणां न वश्यम्, तानि जन(जिन)मुखेक्षणात्  क्षयं याति (यान्ति) । चन्द्रबिम्बं राहोर्मेघानां च गम्यं स्यात् । पुनः किंभूतम् ? अनल्पकान्ति गुरु[तर]द्युति । चन्द्रबिम्बं चाऽल्पप्रभम्, कृष्णपक्षे क्षीणतेजस्त्वात् । मुखं जगद् विश्वं विद्योतयत् । शशिबिम्बं भूखण्डप्रकाशेऽप्यसमर्थम् । अथ नित्यं सदा उद् उल्लासयन् (उल्लसत्) अयः शुभं भाग्यं यस्य तद् नित्योदयम् । अस्मिन् वृत्ते दोषनिर्नाशिनी विद्या । श्रीउदयनमन्त्रीशपुत्रआम्बडकथा ज्ञेया ॥१८॥

[किञ्च]-

**किं शर्वरीषु शशिनाऽह्नि विवस्वता वा ?**
**युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ ! ।**
**निष्पन्नशालिवनशालिनि जीवलोके**
**कार्यं कियज्जलधरैर्जलभारनम्रैः ? ॥१९॥**

किं० । हे नाथ ! शर्वरी[षु] रजनीषु शशिना चन्द्रेण किम् ?। अह्नि दिने विवस्वता वा किं कार्यं भवति ? तमस्सु अन्धकारेषु युष्मन्मुखेन्दु-दलितेषु भवद्वदनचन्द्रविनाशितेषु सत्सु । अथ[वा] तमस्सु पातकेषु । अत्र दृष्टान्तः- जीवलोके भूपीठे निष्पन्नशालिवनशालिनि सति जलभारनम्रैः सलिलभारनतैर्जल-धरैर्घनैः कियत् कालं (कार्यं) स्यात् ?, न किमपीत्यर्थः । निष्पन्नैः शालिवनै[ः] शालि(ल)ते इत्येवंशीलः, तस्मिन् । धान्ये निष्पन्ने मेघाः केवलक्लेशकर्दमशीत-हेतुत्वान्निष्फला एव, यथा(तथा) त्वन्मुखेन्दौ ध्वस्तदुरिततिमिरे शैत्यसन्तापपीडा-कारित्वाच्चन्द्रसूर्याभ्यां न कोऽप्यर्थः । अस्मिन् वृत्तेऽशिवोपशमनी विद्या । लक्ष्मणकथा चाऽस्ति ॥१९॥

अथ ज्ञानद्वारेणाऽन्यदेवान् क्षिपति-

**ज्ञानं यथा त्वयि विभाति कृतावकाशं**
**नैवं तथा हरिहरादिषु नायकेषु ।**
**तेजः स्फुरन्मणिषु याति यथा महत्त्वं**
**नैवं तु काचशकले किरणाकुलेऽपि ॥२०॥**

ज्ञानं० । हे लोकालो[क]प्रकाशज्ञान ! यथा येन प्रकाश (प्रकारेण) कृता[वकाशं] विहितप्रकाशं ज्ञानं सम्यक् त्वयि विभाति, तथा तेन प्रकारेण हरिहरादिषु विष्णुरुद्रादिषु नायकेषु स्वस्वमतपितिषु(-पतिषु) एवंविधं ज्ञानं न तेषु । उपमामाह-स्फुरन्मणिषु भास्वद्वैडूर्यादिरत्नेषु तेजो यथा महत्त्वं गौरवं याति प्राप्नोति तु पुनः एवं तद्वत् किरणाकुलेऽपि काचशकले तेजो न महत्त्वं गच्छतीति । अस्मिन् वृत्ते सूरिमन्त्रः, वक्ष्यमाणवृत्तषट्केषु सूरिमन्त्रो ज्ञेयः । श्रीविजयसेनसूरिकथा च ॥२०॥

अथ निन्दास्तुति[मिश्र]माह-

**मन्ये वरं हरिहरादय एव दृष्टा**
**दृष्टेषु येषु हृदयं त्वयि तोषमेति ।**
**किं वीक्षितेन भवता भुवि येन नाऽन्यः**
**कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥२१॥**

मन्ये० । हे नाथ ! हरिहराद[य] । एव दृष्टा विलोकिता वरं प्रधानमित्यर्थः हं (-मित्यहं) मन्ये । सुरेषु दृष्टेषु हृदयं चित्तं त्वयि भवद्विषये तोषां (तोषं) प्रमोदमेति आयाति । यतस्तेहिं (-तैर्हि) तव मुद्राऽपि न ज्ञाता, ज्ञानं तावद् दूरेऽस्तु । अथ भवतां(ता) वीक्षितेन दृष्टेन किं कार्य(र्यं) येनाऽर्हद्वीक्षणलक्षणेन हेतुनाऽन्यस्त्वदपरः कश्चिद् देवो भवान्तरेण (भवान्तरेऽपि) अन्यजन्मन्यपि भुवि लोके मनो न हरति । अस्मिन् वृत्ते श्रीजीवदेवसूरिकथा ॥२१॥

किञ्च-

**स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्**
**नाऽन्या सुतं त्वदुपमं जननी प्रसूता ।**
**सर्वा दिशो दधति भानि सहस्त्ररश्मिं**
**प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥२२॥**

स्त्रीणां० । स्त्रीणां नारीणां शतानि बहुवचनत्वात् कोटीकोटयः शतशः कोटि[कोटि]सङ्ख्यान् पुत्रान् जनयन्ति प्रस(सु)वते । तासु मध्येऽन्याऽपरा जननी माता त्वदुपमं भवत्समं सुतं नन्दनं न प्रसूताः(ता) नाऽजीजनत् । त्वां

पुत्रं मरुदेव्येव प्रसूता (प्रासूत) । अत्रोपमा- सर्वा दिशोऽष्टौ काष्ठा भानि तारकाणि दधति धारयति (-न्ति), [तथाऽपि] प्राच्येव पूर्वैव दिक् स्फुरदंशुजालं चञ्चत्करकलापं सहस्ररश्मिं सूर्यं जनयन्ति (-यति) प्रसूते) । यथा ऐन्द्री दिक् सूरोदयहेतुः (सूर्योदये हेतुः), तथा तीर्थकृज्जन्मनि मरुदेव्यादयो हेतुरिति वृत्तार्थः । मन्त्रः प्राक्तन एव । प्रभावे श्रीआर्यखप(पु)टाचार्याणां कथा ॥२२॥

परमपुंस्त्वेन स्तुतिमाह-

**त्वामामनन्ति मुनयः परमं पुमांस-**
**मादित्यवर्णममलं तमसः परस्तात् ।**
**त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं**
**नाऽन्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥२३॥**

त्वामा० । हे मुनीन्द्र ! ज्ञानिनस्त्वां परमं पुमांसं पुरुषमामनन्ति भणन्ति । किंभूतम् ? अमलं सकलरागद्वेषमलरहितम् । आदित्यस्येव वर्णः कान्तिर्यस्य तमादित्यवर्णम् । तमसो दुरितस्य परस्तात् । मुनयः सम्यगन्तःकरणशुद्धया त्वामेव, एवशब्दो निश्चये, उपलभ्य प्राप्य मृत्युं मरणं जयन्ति स्फेटयन्ति । अत्र मृत्यु(त्युं-)जया रक्षाऽप्यस्ति । अन्यः (अन्यच्च) शिवपदस्य मोक्षस्थानस्य [अन्यः] त्वत्तोऽपरः शिव[ः] प्रशस्तो निरुपद्रवो वा पन्था मार्गो नाऽस्ति । मुक्तिकारणं त्वमेव । [अत्र] आर्यखप(पु)टसूरिकथा ॥२३॥

अथ सर्वदेवानां नाम्ना जिनं स्तौति-

**त्वामव्ययं विभुमचिन्त्यमसङ्ख्यमाद्यं**
**ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम् ।**
**योगीश्वरं विदितयोगमनेकमेकं**
**ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥२८॥**

त्वाम० । हे सर्वदर्शन (सर्वदर्शिन्) ! सन्तो विचक्षणा यतय एवंविधं प्रवदन्ति । किंविशिष्टम् ? न व्येति न चयापचयं गच्छतीत्यव्ययः, तम् । विभुं व(वि)भवति कर्मोन्मूलने समर्थो भवतीति विभुम् । अध्यात्म(त्मि)कैरपि न चिन्तितुं शक्य[ः], तमचिन्त्यम् । गुणानां न सङ्ख्या इय[त्ता यस्य] तमसङ्ख्यम् । आदौ भव आद्यः, लोकव्यवहारसृष्टिहेतुत्वाच्च(त्वात्), [तम्] । अथवा

चतुर्विंशतिर्जिनेन्द्राणामाद्यं वा । बृंहति अनन्तानन्देन वर्धत इति ब्रह्मा, तम् । सकलसुरेष्वीशितं(तुं) शीलमस्य तमीश्वरम् । अनन्तज्ञानदर्शनयोगादनन्तम् । अनङ्गस्य कामस्य केतुरिव, तम् । यथा केतुरुदितो जगत्क्षयं करोति, तथा भगवान् कन्दर्पस्य क्षये हेतुः । योगिनां चतुर्ज्ञानिनामीश्वरं नाथ[म्] । विदितोऽवगतः सम्यग्ज्ञानदर्शनचारित्ररूपो योगो येन । अनेकं ज्ञानेन सर्वगतत्वात्, अथवाऽनेकं गुणपर्यायापेक्षया, ऋषभादिव्यक्तिभेदाद् वा । एकमद्वितीयम्, एक (एकं) जीवद्रव्यापेक्षया । ज्ञानं तदेव स्वरूपं यस्य तं ज्ञानस्वरूपं चिद्रूपं वा । न मला अष्टादश दोषा यस्य तममलम् । अथैतानि पञ्चदश विशेषणानि परदर्शिषु (परदर्शनिषु) तत्तद्देवाभिधानत्वेन प्रसिद्धानीति ॥२४॥ किञ्च–

**बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्**
**त्वं शङ्करोऽसि भुवनत्रयशङ्करत्वात् ।**
**धाताऽसि धीर ! शिवमार्गविधेर्विधानाद्**
**व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥२५॥**

बुद्ध० । हे विबुधार्चित ! शक्रमहित ! बुद्धः सुगतस्त्वमेव । कस्मात् ? पदार्थेषु बुद्धिबोधाद् मतिप्रकाशात् । अथवा विबुधा विशिष्टपण्डिता गणधरास्तैरर्चितस्तीर्थकरस्तस्य बुद्धिः केवलज्ञानम्, तया बोधो यस्य, तस्मात् । त्वमेव बुद्धो भवसि । हे देव ! शं सुखं करोतीति शङ्करः, स यथार्थनामा त्वमसि, भुवनत्रयशङ्करत्वात् त्रिलोकसुखकारित्वात् । स शङ्करो रुद्रः कपाली नग्नो भैरवः संहारकृन्न शङ्करः । हे धीर ! दध(धा)तीति धा[ता] स्रष्टा त्वमेव कृतार्थनामा, शिवमार्गविधे रत्नत्रयरूप[नि]योगस्य विधानात् । हे भगवन् ! व्यक्तं प्रकटं पुरुषोत्तमस्त्वमेवाऽसि । अस्मिन् वृत्ते श्रीशान्तिसूरिकथा ज्ञेया । मन्त्रः प्राक्तन एव ॥२५॥

अथ पुनर्जिनं नमन्नाह–

**तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !**
**तुभ्यं नमः क्षितितलामलभूषणाय ।**
**तुभ्यं नमस्त्रिजगतः परमेश्वराय**
**तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥२६॥**

तुभ्यं नम० । हे नाथ ! तुभ्यं भवते नमः नमस्कारोऽस्तु । नतौ

नमस्शब्दोऽव्ययः । किंभूताय ? त्रिभुवनार्तिहराय विश्वत्रयपीडानाशनाय । हे स्वामिन् ! तुभ्यं नमोऽस्तु, क्षितितलस्य भूपीठस्याऽमलभूषणाय । अथ[वा] क्षिति[ः] पृथ्वी, तलं पातालम्, अमलं स्वर्गः, तेषां त्रयाणां लोकानां भूषणाय। तुभ्यं नमोऽस्तु, त्रिजगतस्त्रैलोक्यस्य परमेश्वराय प्रकृष्टनाथाय । हे जिन ! तुभ्यं नमोऽस्तु, भवोदधिशोषणाय संसारसागरसन्तापनाय । अस्मिन् वृत्ते लक्ष्मीदायको मन्त्रोऽस्ति । चनिकश्रेष्ठिकथा ज्ञेया माहात्म्ये ॥२६॥

पुनर्युक्त्या गुणान् स्तौति–

**को विस्मयोऽत्र यदि नाम गुणैरशेषै–**
**स्त्वं संश्रितो निरवकाशतया मुनीश ! ।**
**दोषैरुपात्तविविधाश्रयजातगर्वैः**
**स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥२७॥**

को विस्म० । हे मुनीश ! यदीत्यङ्गीकारे, नामेत्यामन्त्रणे । हे सकर्णा ! अस्माभिरङ्गीकृतोऽयमर्थः, [निरवकाशतया] सर्वाङ्गव्यापकतया पुरुषान्तरे–ऽनवस्थानतया, अशेषैः सर्वैर्गुणैस्त्वं संश्रितोऽत्रार्थे को विस्मयः ?। त्वं दोषैः स्वप्नान्तरेऽपि कदाचिदपि नेक्षितोऽसि । दोषैः किंभूतैः ? उपात्तैर्गृहीतैः प्राप्तैर्विविधैर्नानारूपैराश्रयैर्जात उत्पन्नो गर्वो येषां तैः । अस्मिन् वृत्ते मन्त्रः क्षुद्रोपद्रव–नाशकारी वाञ्छितलाभकरश्च, प्रभावे श्रीशाल(लि) वाहनभूपस्य कथा चाऽस्ति ॥२७॥

अथ वृत्तचतुष्टयेन प्रातिहार्यचतुष्कमाह–

**उच्चैरशोकतरुसंश्रितमुन्मयूख–**
**माभाति रूपममलं भवतो नितान्तम् ।**
**स्पष्टोल्लसत्किरणमस्ततमोवितानं**
**बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥२८॥**

उच्चै० । हे सेवकजनकल्पवृक्ष[सदृक्ष] ! भवतस्तव रूपं वपुर्नितान्त–मत्यर्थमाभाति शोभते । किंभूतम् ? उच्चैरतिशयेन जिनदेहाद् द्वादशगुणोच्चो–ऽशोकतरुः कि(क)ङ्केल्लिवृक्षस्तं संश्रितम् । [उद्] उल्लसिता मयूखाः किरणा यस्य यस्माद् वा, तत् । अमलं स्वेदपङ्करहितत्वान्निर्मलम् । किमिवाऽऽभाति ? रिवे(रवे)र्बिम्बमिव । यथा रवेर्बिम्बं पयोधरपार्श्ववर्ति मेघसमीपस्थं भाति ।

तदपि किंभूतम् ? स्पष्टा[:] प्रकटा उल्लसन्त उद्गच्छन्तः यस्य [यस्माद् वा] तत् अस्ततमोवितानं क्षिप्तान्धकारप्रकार(-प्रकरम्)। सूरमण्डलस्वरूपं जिनरूपं मेघतुल्यो नीलदलोऽशोक इति युक्तं साम्यम् ॥२८॥

**सिंहासने मणिमयूखशिखाविचित्रे**
**विभ्राजते तव वपुः कनकावदातम् ।**
**बिम्बं वियद्विलसदंशुलतावितानं**
**तुङ्गोदयाद्रिशिरसीव सहस्त्ररश्मेः ॥२९॥**

सिंहा० । हे तीर्थपते ! मणिमयूखशिखाविचित्रे रत्नकान्तिचूलाचारुणि हैमे सिंहासने कनकावदातं हेमगौरं तव वपुर्देहं विभ्राजते भाति । किमिव ? सहस्त्ररश्मेर्बिम्बमिव । यथा सूरमण्डलं तुङ्गोदयाद्रिशिरसि उन्नतपूर्वाचलशृङ्गे वर्तमानं भाति । किंभूतम् ? वियति आकाशे विलसन्तो द्योतमाना येंऽशवः कराः, तेषां लतावितानं [मालाविस्तारो] यस्य [यस्माद् वा], तद् । अत्रांऽशु-वृन्दसमा मणिमयूखमाला, पूर्वाद्रिशिखरसमानं सिंहासनम्, रविबिम्बोपमानं वपुरिति समता । यतः प्रथमतीर्थकृतो रूपं स्वर्णवर्णं वर्ण्यते ॥२९॥

**कुन्दावदातचलचामरचारुशोभं**
**विभ्राजते तव वपुः कलधौतकान्तम् ।**
**उद्यच्छशाङ्कशुचिनिर्झरवारिधार-**
**मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥३०॥**

कुन्दा० । हे पारगत ! कलधौतकान्तं चामीकररुचिरं तव वपुर्देहं विभ्राजते । किंभूतम् ? कुन्दवदवदाताभ्यां चलाभ्यां चामराभ्यां चार्वी मनोज्ञा शोभा यस्य, तत् । [किमिव ?] सुरगिरेरुच्चैस्तटमिव शिखरमिव । यथा शातकौम्भं सौवर्णम्, उच्चैः उच्चं सुरगिरेर्मेरोस्तटं प्रस्थं भाति । तदपि तटं उद्यन् उद्गच्छन् शशाङ्कश्चन्द्रवत् शुचिर्धवला निर्झरस्य वारिधारा जलवेणी यत्र [यस्माद् वा], तत् । अत्र मेरुतटसमं श्रीनाभेयदेहम्, निर्झरजलधारा वरे चामरे इत्युपमा मनोरमा ॥३०॥

**छत्त्रत्रयं तव विभाति शशाङ्ककान्त-**
**मुच्चैः स्थितं स्थगितभानुकरप्रतापम् ।**

**मुक्ताफलप्रकरजालविवृद्धशोभं**
**प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥३१॥**

छत्र० हे पवित्रचरित्र ! उच्चैरूर्ध्वं मूर्ध्नि निविष्टं तव छत्रत्रयमातपत्रत्रितयं विभाति । किंभूतम् ? स्थगितः छादितो भानोः करप्रतापो येन । पुनः किंभूतम् ? मुक्तामा(फ)लानां प्रकरस्य समूहस्य जालेन [रचना]विशेषेण [विवृद्धा] वृद्धिं गता शोभा यस्य तत् । त्रिजगतः परमेश्वरत्वं महाधिपत्यं प्रख्यापयत् कथयत् । अस्मिन् वृत्ते विद्यादेयवाक्या व्याख्याने, सर्वकार्यसिद्धिकरी, सङ्ग्रामजय-दायिकाऽस्ति । गोपालक्षत्रियस्य कथा ज्ञेया ॥३१॥

अथाऽतिशयद्वारेण जिनं स्तौति-

**उन्निद्रहेमनवपङ्कजपुञ्जकान्ति-**
**पर्युल्लसन्नखमयूखशिखाभिरामौ ।**
**पादौ पदानि तव यत्र जिनेन्द्र ! धत्तः**
**पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥३२॥**

उन्निद्र० । हे जिनेन्द्र! तव पादौ चरणौ यत्र भूमौ पदानि गमनेऽवस्थानरूपाणि धत्तः-न्यस्यतः, विबुधास्तत्र धरा पीठे पद्मानि कमलानि परिकल्पयन्ति रचयन्ति । किंभूतौ चरणौ ? उन्निद्राणि हेम्नः स्वर्णस्य नवानि नूतनानि नवसङ्ख्या(का)नि वा [पङ्कजानि] कमलानि, तेषां पुञ्जस्तस्य कान्तिर्द्युतिः, पर्युल्लसन्ती समन्तादुच्छलन्ती या नखानां मयूखशिखा करण(किरण)चूला, उन्निद्रहेमनवपङ्कजपुञ्जकान्त्या पर्युल्लसन्नखमयूखशिखया वाऽभिरामौ रुचिरौ । कोऽर्थः ? एका नवस्वर्णकान्तिः पीता, अपरा दर्पणनिभा नखप्रभा चरणौ वर्णविचित्रौ चक्रतुरिति ॥३२॥

अथ संक्षिपति-

**इत्थं यथा तव विभूतिरभूज्जिनेन्द्र !**
**धर्मोपदेशनविधौ न तथाऽपरस्य ।**
**यादृक् प्रभा दिनकृतः प्रहतान्धकारा**
**तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥३३॥**

इत्थं० । हे जिनेन्द्र ! इत्थं पूर्वोक्तप्रकारेण यथा यद्वद् धर्मोपदेशनविधौ

धर्मव्याख्यानक्षणे तव विभूतिरतिशयरूपा समृद्धिरभूत् यथा तद्वदपरस्य ब्रह्मादिसुरस्य नाऽऽसीत् । अत्र दृष्टान्तः-दिनकृतः सूर्यस्य प्रहतान्धकारा ध्वस्तध्वान्ता यादृग् यादृशी प्रभा वर्तते, विकाशिनोऽपि उदितस्याऽपि ग्रह[ग]णस्य भौमादेस्तादृक् तादृशी प्रभा कुत[:] कस्माद् भवति । अस्मिन् वृत्ते सर्वसम्पत्करो मन्त्रोऽस्ति । महिमनि जिणहाकस्य कथा ज्ञेया ॥३३॥

अथ गजभयहरं तीर्थकरं स्तौति-

**श्च्योतन्मदाविलविलोलकपोलमूल-**
**मत्तभ्रमद्भ्रमरनादविवृद्धकोपम् ।**
**ऐरावताभमिभमुद्धतमापतन्तं**
**दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥**

श्च्यो० । हे गजपतिगते ! त्वदाश्रितानां त्वच्चरणशरणस्थानां जनानामापतन्तमागच्छन्तमिभं दुष्टगजं दृष्ट्वा भयं न भवति । किंभूतम् ? श्च्योतन् क्षरन् यो मदो मदवारि, तेन आविला व्याप्ताः विलोलं चञ्चलं कपोलमूलम्, तस्मिन् मत्ताः क्षीबाः सन्तो भ्रमन्तो भ्रमणशीला ये भ्रमराः, तेषां नादेन झङ्कारध्वनिना विवृद्धो वृद्धिं गतः कोपः क्रोधो यस्य तम् । ए(ऐ)रावताभं महाकायत्वादैरावणसममुद्धतमविनीतं दुर्दान्तमिति । एषु वृत्तेषु वक्षमाणतत्तीर्थकृद्भीहर (तत्तद्भीहर) -वृत्तवर्णा एव मन्त्राः पुनः [पुनः] स्मर्तव्याः, अतो नाऽपरमन्त्र-निवेदनम् । प्रभावे सोमराजा(राज)कथा ज्ञेया ॥३४॥

अथ सिंहभयं क्षिपति-

**भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्त-**
**मुक्ताफलप्रकरभूषितभूमिभागः ।**
**बद्धक्रमः क्रमगतं हरिणाधिपोऽपि**
**नाऽऽक्रामति क्रमयुगाचलसंश्रितं ते ॥३५॥**

भिन्ने० । हे पुरुषसिंह ! हरिणाधिपोऽपि सिंहोऽपि क्रमगतं फालप्राप्तं ते तव क्रमयुगाचलसंश्रितं चरणयुग्मपर्वतकृतावासं पुरुषं न आक्रमति न ग्रहणाय उद्यतते न हन्तुमुद्धावति । किंभूतो हरिणाधिपः ? भिन्नाभ्यां विदारिताभ्यामिभ-कुम्भाभ्यां गलता पतता उज्ज्वलेन रक्तश्वेतवर्णेन शोणिताक्तेन रुधिरव्याप्तेन

मुक्ताफलप्रकरेण मौक्तिकसमूहेन भूषितो मण्डितो भूमिभागो येन सः । बद्धाः क्रमाः पादविक्षेपा यस्य सः । देवराजस्य कथा ज्ञेया ॥३५॥

अथ दावानलभयं निरस्यति–

**कल्पान्तकालपवनोद्धतवह्निकल्पं**
**दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिङ्गम् ।**
**विश्वं जिघत्सुमिव सम्मुखमापतन्तं**
**त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥३६॥**

कल्पां०। हे कर्मक्षयकृशानो! त्वन्नामकीर्तनजलं त्वदभिधानस्तवननीरमशेषं सकलं दावानलं वनवह्निः (–वह्निं) शमयति विनाशयति । किंभूतं दावानलम् ? कल्पान्तकालपवनेन युगान्तसमयवातेन उद्धत उत्कटो यो वह्निरग्निस्तेन कल्पम् । ज्वलितं दीप्तम् । उज्ज्वलं ज्वालारक्तम् । उत्स्फुल्लिङ्गमुल्लसव(द्व)ह्निकणम् । विश्वं जिघत्सुमिव जगज्जिग्रसिषुमिव । सम्मुखमापतन्तमभिमुखमायान्तम् । त्वन्नामस्मरणनीरं दावानलं स्फोटयतीत्यर्थः । प्रभावे लक्ष्मीधरकथा ॥३६॥

अथ भुजङ्गभयं दलयन्नाह–

**रक्तेक्षणं समदकोकिलकण्ठनीलं**
**क्रोधोद्धतं फणिनमुत्फणमापतन्तम् ।**
**आक्रामति क्रमयुगेन निरस्तशङ्क–**
**स्त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥**

रक्ते० । हे नागपतिसेव्य ! पुंसो हृदि त्वन्नामनागदमनी त्वन्नाममेव (त्वन्नामैव) नागदमनी ओषधीविशेषो जाङ्गुलीविद्या वा । स निरस्तशङ्को निर्भयः क्रमयुगेन निजपदद्वन्द्वेन फणिनं सर्पमाक्रमति घर्षति रज्जुवत् स्पृशतीति । किंभूतम् ? रक्तेक्षणं ताम्रनेत्रम् । समदकोकिलकण्ठनीलं मत्तपिकगलकालम् । क्रोधोद्धतं कोपोत्कटम् । उत्फणमूर्ध्वीकृतफटम् । आपतन्तं सम्मुखं धावन्तम् । प्रभावे महेभ्यश्रेष्ठिनः कथा ॥३७॥

अथ रणान्तकं संहरन्नाह–

**वल्गत्तुरङ्गगजगर्जितभीमनाद–**
**माजौ बलं बलवतामपि भूपतीनाम् ।**

**उद्यद्दिवाकरमयूखशिखापविद्धं**
**त्वत्कीर्तनात् तम इवाऽऽशु भिदामुपैति ॥३८॥**

वल्ग० । हे देवाधिदेव ! त्वत्कीर्तनात् त्वन्नामग्रहणादाजौ सङ्ग्रामे बलवतामपि भूपतीनां राज्ञां बलं सैन्यं भिदामुपैति स्फुटनमायाति । किंभूतम् ? वल्गतां धावतां तुरङ्गाणां गजानां च गर्जितानि भीमनादा यत्र तत् । [अथवा क्रियाविशेषणस्य] सङ्ग्रामस्य । किमिव ? तम इव । [यथा] उद्यद्दिवाकरमयूख-शिखापविद्धमुद्गच्छत्सूरकरततिप्रेरितं सूर्यकरक्षिप्तं तमोऽन्धकारं याति प्रलयं प्रयाति, तद्वदित्यर्थः ॥३८॥ किञ्च-

**कुन्ताग्रभिन्नगजशोणितवारिवाह-**
**वेगावतारतरणातुरयोधभीमे ।**
**युद्धे जयं विजितदुर्जयजेयपक्षा-**
**स्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥३९॥**

कुन्ता० । हे जिनेश्वर ! त्वत्पादपङ्कजवनाश्रयिणस्त्वत्पदपद्मखण्डभाजो जना युद्धे रणे जयं विजयं लभन्ते प्राप्नुवन्ति । किंभूते युद्धे ? कुन्ताग्रैर्भल्लाग्रैर्भिन्नानां पाटि[ता]नां गजानां शोणितं रक्तमेव वारिवाहो जलप्रवाहः, तस्मिन् वेगावतारात् शीघ्रप्रवेशात् तरणे प्लवने आकुलैः (आतुरैः) व्याकुलैर्योधैर्भटैर्भीमम्, तस्मिन् । किंभूता जनाः ? विजितः पराजितो दुर्जयोऽजयो जेयपक्षो जेतव्यगणो यैस्ते इति । रणकेतुराज्ञः कथा ॥३९॥

अथ जलापदं शमयन्नाह-

**अम्भोनिधौ क्षुभितभीषणनक्रचक्र-**
**पाठीनपीठभयदोल्बणवाडवाग्नौ ।**
**रङ्गत्तरङ्गशिखरस्थितयानपात्रा-**
**स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥४०॥**

अम्भो० । [हे भववार्धिपोत !] अम्भोनिधौ समुद्रे एवंविधे सति सांयात्रिका जना भवतः स्मरणात् त्रासमाकस्मिकं भयं विहाय त्यक्त्वा व्रजन्ति क्षेमेण स्वस्थानं यान्ति । किंभूते ? क्षुभितानि क्षोभं गतानि भीषणानि रौद्राणि नक्रचक्राणि च पाठीनाश्च पीठाश्च, भयदो भीकृत्, उल्बणः प्रकटो वाडवाग्निश्च

यत्र स तथा, तस्मिन् । किंभूता जनाः ? रङ्गत्तरङ्गशिखरस्थितयानि(न)पात्रा उच्छलत्कल्लोलाग्रवर्तवहनाः (वर्तिवहनाः) । नक्रचक्रं दुष्टजलजन्तुवृन्दम् । पाठीनपीठौ मत्स्यभेदौ । धनावहकथा ज्ञेया ॥४०॥

अथ रोगभयं भिन्दन्नाह–

**उद्भूतभीषणजलोदरभारभुग्नाः**
**शोच्यां दशामुपगताश्च्युतजीविताशाः ।**
**त्वत्पादपङ्कजरजोऽमृतदिग्धदेहा**
**मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४१॥**

उद्भूत० । हे कर्मव्याधिधन्वन्तरे ! मर्त्या नरा उद्भूतभीषणजलोदरभारभुग्ना उत्पन्नरौद्रोदरवृद्धिव्याधिभरवक्रीकृताः, भग्ना वा पाठे मोटिताः । शोच्यां दशामुपगता दीनामवस्थां प्राप्ताः । च्युतजीविताशास्त्यक्तजीवितवाञ्छाः । एवंभूतास्त्वत्पादपङ्कजरजोमृतदिग्धदेहा भवच्चरणकमलरेणुसुधालिप्तवपुषः । मकरध्वज[तुल्य]रूपाः कामसममूर्तयः कमनीयकान्तयो भवन्ति । यथा सुधापानाभिषेकात् सर्वरोगनाशस्तथा भवत्पदपद्माश्रयणादपि सकलबोधे(व्याधे)-रुपशम इति । राजहंसकुमारस्य कथा ज्ञेया ॥४१॥

अथ बन्दिबन्धनभयं क्रन्दन्नाह–

**आपादकपठमुरुशृङ्खलवेष्टिताङ्गा**
**गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ।**
**त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः ।**
**सद्यः स्वयं विगतबन्धभया भवन्ति ॥४२॥**

आपाद० । हे अप्रतिचक्रार्चितचरण ! आपादकण्ठ(–कण्ठं) पदं(पदगलं) यावद् उरुशृङ्खलवेष्टिताङ्गाः गुरुलोहदामव्याप्तवपुषः गाढं निबिडं बृहन्निगडकोटिनिघृष्टजङ्घा विकटाष्टीलाग्रकर्षितनलकिनीका मनुजा नराः, त्वन्नाममन्त्र(न्त्रम्)'ॐ ऋषभाय नमः' इति पदमनिशं सदा जपन्तो ध्यायन्तः सद्यस्तत्कालं स्वयमात्मनैव विगतबन्धभयाः स्व(ध्वस्त)बन्धनशङ्का भवन्त(न्ति) जायन्त इति । एतस्य महिमा पूर्वं श्रीमानतुङ्गाचार्याणां निबिज(ड) [निगड]शृङ्खलजालभञ्जनादभूत्, तदनु रणपालादीनां बहूनामपि ॥४२॥

अथाष्टभीनाशे[न] स्तवं संक्षिपन्नाह–

**मत्तद्विपेन्द्र–मृगराज–दवानलाऽ–हि–**
**सङ्ग्राम–वारिधि–महोदर–बन्धनोत्थम् ।**
**तस्याऽऽशु नाशमुपयाति भयं भियेव**
**यस्तावकं स्तवमिमं मतिमानधीते ॥४३॥**

मत्त० । हे अमेयमहिमन् ! तस्य प्राणिनो भयं भीः आशु शीघ्रं [भियेव] भयेनेव नाशमुपयाति ध्वंस[मा]याति, यो मतिमान् सप्रसिद्धिः (सप्रज्ञः) पुमान् तावकं भवदीयमिमं प्रागुक्तस्वरूपं स्तवं स्तोत्रमधीते पठति । किंभूतं भयम् ? मत्तद्विपेन्द्रश्च मृगराजश्च दवानलश्च अहिश्च सङ्ग्रामश्च वारिधिश्च महोदरश्च बन्धनं च तेभ्य उत्था उत्पत्तिर्यस्य [त]त् ॥४३॥

[अथ स्तवप्रभावसर्वस्वमाह–]

**स्तोत्रस्रजं तव जिनेन्द्र ! गुणैर्निबद्धां**
**भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् ।**
**धत्ते जनो य इह कण्ठगतामजस्रं**
**तं 'मानतुङ्ग'मवशा समुपैति लक्ष्मीः ॥४४॥**

स्तोत्रस्रजं० । हे जिनेन्द्र ! [केवलिपते !] इह जगत्यां यो जनोऽजस्रमनवरतं तव स्तोत्रं तवं(स्तवं) बहुपदसन्दर्भितत्वात् स्रगिव स्तोत्रस्रक् [तां] स्तोत्रमालां कण्ठगतां कण्ठपीठलुठ(ठि)तां करोति, [पठती]त्यर्थः । किंभूताम् ? भक्त्या भावपूर्वं मया श्रीमानतुङ्गसूरिणा गुणैः पूर्वोक्तैः [ज्ञानाद्यैः] निबद्धां रचितां, रुचिरा मनोज्ञा वर्णा आ(अ)काराद्या विचित्राणि यमकाऽ–नुप्रास–व्यङ्ग्यादिना विशेषेणाद्भुतानि पुष्पाणीव यस्या (यस्यां) ताम् । लक्ष्मीः श्रीः । तु मानतुङ्गं साभिमानम् । अवशा तद्गतचित्ता । एतस्य वृत्तस्य वृत्तावर्थषट्कं प्ररूपितमस्ति, अत्रैक एवार्थो व्याख्यातोऽस्ति, शेषमर्थपञ्चकं स्वयमभ्यूह्यं तज्ज्ञैः ॥

इति श्रीभक्तामरस्तोत्रस्यावचूरिर्लिखिता वृत्तेरुपरि ॥

**छः ॥ श्री छः ॥३७६॥**

C/o. जैन उपाश्रय, कृष्णनगर,
भावनगर–३६४००१